Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# भाषाविज्ञानदृष्ट्या मैथिलीसंस्कृतभाषयोः ध्वनितत्त्वानुशीलनम्



गौतमकुमारराजहंस:
शोधार्थी,
श्रीसदाशिवपरिसर:,
केन्द्रीयसंस्कृतविश्वविद्यालय:,

**Article Info**
Volume 3, Issue 5
Page Number : 304-314

**Publication Issue :**
September-October-2020

**Article History**
Accepted : 20 Sep 2020
Published : 30 Sep 2020

**शोधपत्रसारांश:-** संस्कृतं मैथिली च भारतीये द्वे मुख्ये भाषे स्तः। उभयोः भाषयोर्मध्ये अस्ति कश्चन समीपतरः सम्बन्धः। अस्य सम्बन्धस्य ज्ञानं भाषाविज्ञानस्य माध्यमेन भवति। भाषाविज्ञानस्य तुलनात्मकशाखया द्वयोः भाषयोः समग्रं भाषावैज्ञानिकं तौलनिकं च चिन्तनं क्रियते । अनया रीत्या मैथिलीसंस्कृतभाषयोः ध्वनिसम्बन्धिनी कीदृशी भाषावैज्ञानिकी चिन्तनधारा अस्ति तथा उभयोर्भाषयोर्मध्ये ध्वनिविषयकं किं साम्यं किञ्च वैषम्यम् अस्तीति अस्मिन् शोधपत्रे विव्रियते।

**कूटशब्दा:-** ध्वनिः , ध्वनिविज्ञानम् , भाषाविज्ञानम्, मैथिली, संस्कृतम्, स्वराः, व्यञ्जनानि।

**1. ध्वनिशब्दार्थनिरुपणम्** - ध्वनति ध्वनयति वेति व्युत्पत्या ध्वनिरिति पदेन शब्द: गृह्यते । ध्वनि: अक्षररूपेण परिचीयते। पस्पाशाह्निके तत्त्वालोके प्रतिपाद्यते यत् " ध्वनि: कादिवर्णात्मक:" । ध्वनय एव वर्णा: इति भाव:।[1] ध्वन्यालोके आनन्दवर्धनेन उक्तं यत् वैयाकरणा: श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति ।[2] यत्र ध्वनिपदेन शब्द: गृहीत: , तत्र स: शब्द: व्यक्ताव्यक्तसाधारण: ध्वनिरूप: । यथा पदार्थयो: अभिघाताख्यसंयोगात् पटत् पटत् इति, वेणो: विभागाच्च चटत् चटतेति अव्यक्ता: ध्वनय: प्रादुर्भवन्ति । पुनश्च जिह्वाव्यापारेण ताल्वादिस्थानेभ्य: वायो: संयोगात् व्यक्ता: वर्णरूपा: ध्वनय: प्रभवन्ति । अत्र उभयत्रापि ध्वनिशब्दव्यापार: प्रचलति लोके । भाषाविज्ञानदृष्ट्या अत्र ध्वनिशब्द: सामान्यार्थपर: न विद्यते न च साहित्यपर: । यथा कोलाहलं कुर्वत: छात्रान् शान्तयितुं शिक्षकद्वारा मार्जन्या उत्पीठिकायामुपरि ताडनानन्तरं य:

[1] तत्त्वालोक:

[2] ध्वन्यालोक:, प्रथमोद्योत:

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

ध्वनि: जायते स: सामान्य : ध्वनि: किञ्च साहित्ये मानवेतरवस्तुभिरपि उत्पन्न: ध्वनि: कदाचित् सार्थकध्वनिरिति मन्यते । यथा रघुवंशे राज्ञ: दिलीपस्य गोचारणार्थं गम्यमाने समये वंशवृक्षछिद्रद्वारा समुत्पन्न: ध्वनि: यशोगानात्मक: स्वीकृत: महाकविना कालिदासेन -

**स कीचकैर्मारुतपूर्णरन्ध्रै:, कूजद्भिरापादितवंशकृत्यम् ।**
**शुश्राव कुञ्जेषु यश: स्वमुच्चै: उद्गीयमानं वनदेवताभि:।।**[3]

विषयेस्मिन् वाक्यपदीये प्रतिपादितमस्ति यत् प्राणिनां ध्वनौ सर्वत्र संस्काररुपा प्रतिभा एव कारणं भवति-

**अभ्यासात् प्रतिभाहेतु: सर्व: शब्दपरै: स्मृत: ।**
**बालानाञ्च तिरश्चां च यथार्थप्रतिपादने ।।**

वस्तुत: मानवभिन्नेषु पश्वादिषु अपि स्वाभाविकी काचित् प्रतिभा वर्तते , येन मनुष्याह्वाने पशव: प्रवृत्ता: भवन्ति । पुनश्च पशव: यदा हुँ इत्याकारयन्ति तदा वत्सा: तत्क्षणमेव तेषां समक्षमायान्ति। अनेन ज्ञायते यत् अव्यक्तध्वनिरपि ग्राह्यो वर्तते। भाषाविज्ञाने तु एवम्प्रकारका: ध्वनय: ध्वनिविज्ञानस्य विवेचने विश्लेषणे वा न गृह्यन्ते अपितु मानववागिन्दियै: व्यक्ता: उच्चारिता: वा ध्वनय एव ग्राह्यास्सन्ति ।

**2.ध्वने: परिभाषा-**

भाषा मानवस्य ध्वन्यात्मिका अभिव्यक्तिर्वर्तते । ध्वनिसमूह एव भाषा एतदर्थमेव कथ्यते । भाषाविज्ञाने सामान्यरूपेण श्रवणेन्द्रियग्राह्य: वागिन्द्रियद्वारा व्यक्त: वायुविशेष: एव ध्वनिपदवाच्यो भवति । भाषाविज्ञानपरिधौ ध्वनि: वक्तरि श्रोतरि वायौ च समाश्रितो वर्तते । भौतिकविज्ञानानुसारं ध्वनिरेका शक्तिरस्ति । अस्माभि: यत्किमपि श्रूयते तद्ध्वनिरिति कथ्यते । अत्र मानवानां वचनम् , पक्षिणां कलरव:, मेघानां गर्जनम्, सर्वमपि अन्तर्भवति । अत: ध्वने: क्षेत्रं सुविस्तृतं मन्यते । डा० भोलानाथतिवारीमहोदयस्य मतेन वैज्ञानिकदृष्ट्या ध्वनि: वायुमण्डलीयस्य प्रभावस्य परिवर्तनं वर्तते । परिवर्तनमिदं वायुकणानां ( Air-Particles) प्रभावेण विरलेन ( Rarefaction) च भवति ।[4] अस्माभि: पूर्वमेव ज्ञातं यदत्र भाषाविज्ञाने ध्वनि: व्यापकरूपेण न स्वीक्रियते अपितु संकुचित एवार्थ: स्वीकृत: । इत्थं ध्वनिरत्र द्विविध: भवति -




[3] रघु०

[4] भा० वि० -पृ० 305

डा० अम्बादासजीमहोदयस्य मतानुसारं " य: ध्वनि: मनुष्यस्य वागवयवै: उत्पद्यते स: भाषणध्वनि: भवति । यश्च वृक्षाणां संयोगेन मेघानां परस्परं मेलनेन उत्पन्नो भवति स : सामान्य: ध्वनि: कथ्यते ।[5] ध्वनिशब्दस्य परिभाषा भारतीयै: पाश्चात्यैश्च बहुभि: विद्वद्भि: कृता वर्तते । अत्र कतिपयविदुषां ध्वनिशब्दविषयिणीं परिभाषामुदाहरामि -

(1) भाषाध्वनि: भाषायां प्रयुक्तस्य ध्वने: लघुतर: खण्ड: विद्यते । यस्य उच्चारणश्रवणदृष्ट्या स्वतन्त्रम् अस्तित्वं स्यात् ।[6]

(2) भाषाविज्ञानदृष्ट्या मानवध्वनियन्त्रेण नि:सृत: शब्द: ध्वनिरिति कथ्यते।[7]

(3) ध्वनि: मानवस्य नियतस्थानप्रयत्नाभ्याम् उच्चारित: श्रोत्रेन्द्रियद्वारा गृहीत: शब्दलहरीविशेष: अस्ति ।[8]

उपर्युक्तपरिभाषाभि: ध्वने: कानिचित् वैशिष्ट्यानि परिलक्ष्यन्ते -

(1) ध्वनि: भाषाया: लघुतम: खण्ड: अस्ति।

(2) ध्वने: स्वतन्त्रमस्तित्त्वं विद्यते।

(3) ध्वनौ उच्चारणश्रवणपक्षयो: गुरुत्त्वपूर्णं स्थानमस्ति।

(4) ध्वनि: वागवयानां साहाय्येन उच्चरितो भवति।

(5) प्रत्येकं ध्वनि: पूर्ण: स्वतन्त्रश्च भवति।

वस्तुत: ध्वने: क्षेत्रन्तु अत्यन्तं विस्तृतमस्ति परमत्र भाषाध्वनिरेव मम विवेच्यविषयोऽस्ति । भाषाध्वने: विचार: भाषाविज्ञानस्य ध्वनिविज्ञानेन अङ्गेन क्रियते अत: किमिदं ध्वनिविज्ञानमिति आदौ विचारयाम: ।

ध्वनिविज्ञानं भाषाशास्त्रस्य महत्त्वपूर्णमङ्गं विद्यते । आङ्ग्लभाषायां ध्वनिविज्ञानस्य कृते पदद्वयं प्रयुज्यते - Phonology, Phonetics इति । उभयो: पदयो: Phone इति ग्रीकमूलशब्द: अस्ति । Phone इत्यस्य **ध्वनि:** इत्यर्थो भवति । संस्कृतव्याकरणे अपि **भण्** धातो: अर्थ: ध्वननमित्यस्ति । ग्रीकभाषायां संस्कृतस्य चतुर्थ: वर्ण: द्वितीयवर्णत्वेन परिवर्तते । अत: भण् इत्यस्य भकार: फकाररूपेण परिवर्तते। । उभयो: आङ्ग्लपदयो: अर्थ: ध्वनिविज्ञानमेव। यद्यपि उभयो: पदयो: अर्थे साम्यमस्ति तथापि केचन सूक्ष्मभेदमपि चिन्तयन्ति ।

अत: सामान्यतया वक्तुं शक्यते यत् " यत्र ध्वनेरितिहास: , उत्पत्ति: , ध्वनिपरिवर्तनम् , भाषामात्रस्य ध्वनीनां स्वनानां वा उच्चारणप्रक्रियाया: ध्वनिभेदानाञ्च विस्तृतं विवेचनं विश्लेषणं वा क्रियते तत् ध्वनिविज्ञानं कथ्यते ।

[5] भाषिकी ,पृ० 59

[6] भोलानाथ तिवारी , भा०वि० , पृ० 305

[7] प्रो०डोनियलजोन्स:, भाषिकी, पृ० 66

[8] डा० बाबूराम सक्सेना , भाषिकी ,पृ० 66

**3. वैदिकसंस्कृतध्वनय:-**

वैदिकसंस्कृते अधोलिखिता: 52 ध्वनय: प्राप्यन्ते । यद्यपि संस्कृतध्वनिविषये विविधेषु ग्रन्थेषु ध्वने: संख्याविषये एकमतं नास्ति तथाप्यत्र सामान्यरूपेण स्वीकृता: व्यावहारिका: वैदिकलौकिकसंस्कृतध्वनय: प्रस्तूयन्ते -

**स्वरा:-**

मूलस्वरा- अ आ इ ई उ ऊ ऋ ॠ लृ ए ओ -11

संयुक्तस्वरा:- ऐ (अइ) औ (अउ)- 02

**व्यञ्जनानि -**

स्पर्शव्यञ्जनानि - क् ख् ग् घ् ङ् - कण्ठ्यवर्णा:, च् छ् ज् झ् ञ् - तालव्यवर्णा:,

ट् ठ् ड् (ळ्) ढ् (ळ्ह्) ण् - मूर्धन्यवर्णा:, त् थ् द् ध् न् - दन्त्यवर्णा:, प् फ् ब् भ् म् - ओष्ठ्यवर्णा: - 27

अन्तस्था : - य् र् ल् व् - 04 , अघोषसंघर्षीवर्णा:- श् ष् स् - 03 , घोषोष्म:- ह् - 01

अघोषोष्म:- : ( विसर्ग:), क्- जिह्वामूलीय: , प् - उपध्मानीय:- 03

शुद्धानुनासिक:- अनुस्वार: - 01 = 52

**4. लौकिकसंस्कृतध्वनय:-**

**मूलस्वरा-** अ आ इ ई उ ऊ ऋ ॠ लृ ए ओ -11

**संयुक्तस्वरा-:** ऐ (अइ) औ (अउ) - 02

**व्यञ्जनानि -**

स्पर्शव्यञ्जनानि -

क् ख् ग् घ् ङ् - कण्ठ्यवर्णा:, च् छ् ज् झ् ञ् - तालव्यवर्णा:, ट् ठ् ड् ढ् ण् - मूर्धन्यवर्णा: ,त् थ् द् ध् न् - दन्त्यवर्णा: , प् फ् ब् भ् म् ओष्ठ्यवर्णा: - 25

अन्तस्था : - य् र् ल् व् - 04 ,अघोषसंघर्षीवर्णा-: श् ष् स् - 03 ,घोषोष्म-: ह् - 01

अघोषोष्म-: : ( विसर्ग(: – 01 , शुद्धानुनासिक-: अनुस्वार: - 01 = 48

**5. मैथिलीध्वनय:-**

भाषाशास्त्रे भाषाया: उपयोगाय ध्वनि: स्वन: स्वनिमो वोच्यते। अस्यैव रैखिकप्रतीक: वर्ण: ध्वनिर्वा भवति। तेषामेव वर्णानां सुविन्यस्ता सूची वर्णमाला कथ्यते। मैथिल्या: प्रचलिता वर्णमालासारिणी अधस्तात् द्रष्टुं शक्यते[9]-

स्वरा: व्यञ्जनानि च -

अ , आ , इ ,ई ,उ , ऊ , ऋ ,ॠ, ऌ,, ए , ऐ , ओ , औ , अं अ :

[9] मै.परि.पृ.31

क् ख् ग् घ् ङ् , च् छ् ज् झ् ञ् , ट् ठ् ड् ढ् ण् ,त् थ् द् ध् न् ,प् फ् ब् भ् म् , य् र् ल् व् श् ष् स् ह्
वर्णमालायामस्यां ये ध्वनयो वर्णा वा सन्ति तेषामुपजीव्यं तु वैदिकं लौकिकं वा संस्कृतं मन्यते। किन्तु मैथिल्यां केचन ध्वनय: अनुपयुक्तास्सन्ति। मैथिल्यां प्रायश: सर्वाभ्य: भाषाभ्य: शब्दा: सन्ति, आधिक्यं तु संस्कृतशब्दानामेव विद्यते। अत एव सर्वे संस्कृतध्वनय: प्राप्यन्ते। तर्हि केचन अनुपयुक्ता: सन्तीति यत् प्रोक्तं तस्य अभिप्रायद्वयं विद्यते।[10] -

(1) मैथिलीशब्देषु ऋ , ॠ ऌ, ञ् , ण् , य् व् , श् , ष् चेति ध्वनीनां प्रयोगा: दृश्यन्ते, परं विशुद्धमैथिल्याम् एतेषां प्रयोगा: नावलोक्यन्ते।

(2) भाषाशास्त्रदृष्ट्या सूक्ष्मतयाऽवलोकनेन ज्ञायते यत् वर्णमालायां केवलं मूलध्वनय: भवेयु: न तु भेदोपभेदा: ध्वनय:। यतोहि भेदोपभेदानां ध्वनीनां समाप्तिरेव नास्ति। यथा - केयो कखनहु किनल बजताह। कखनहु किनल । कखनहु कीऽनल। कीऽऽनल इति।[11]

**6. मैथिलीसंस्कृतभाषयो: ध्वनीनां साम्यं वैषम्यञ्च-**

संस्कृतात् वर्तमानमैथिलीं यावत् भाषाया: विकासक्रम: महान् अस्ति। अत्र ध्वन्यात्मक-परिवर्तनं महत्त्वपूर्णं विद्यते यतोहि ध्वनि: भाषाया: विशिष्ट: अंश:। भाषायां परिवर्तनस्य प्रथमारम्भ: ध्वनिपरिवर्तनादेव मन्यते। अतोऽत्र प्रमुखं भवति यत् संस्कृतध्वनय: मैथिल्यां कथं प्राप्ता:? यद्यपि ध्वनिपरिवर्तनस्य बहूनि कारणानि मन्यन्ते किन्तु तेषामत्र उल्लेखो न क्रियते। अधुना अत्र ध्वनिपरिवर्तनस्य प्रवृत्याधारेण द्वयो: भाषयो: परस्परं तौलनिकं सम्बन्धं पश्याम:।

**7. संस्कृतध्वनीनां मैथिल्यां परिवर्तनम् -**

परिवर्तनं सृष्टे: निरन्तरं प्रवर्तमान: नियम:। आचार्यः यास्क: निरुक्ते वार्ष्यायणे: मतमुद्धरन् वदति यत् संसारस्य सर्वेषु भौतिकतत्त्वेषु षड्विकारा: भवन्ति।[12] तथैव या कापि भाषा आत्मान: स्वरूपं परिवर्तयति। यथा वैदिकसंस्कृतं लौकिकसंस्कृतरूपेण परिवर्तितम्। पुनश्च पालि-प्राकृतापभ्रंशादिरूपेण परिवर्त्य वर्तमानभारतीयभाषा मैथिलीत्यादिरूपा अभवत्।

मयोक्तं यत् भाषायां परिवर्तनारम्भ: ध्वनिपरिवर्तनेन आरभते। इदं ध्वनिपरिवर्तनं प्राचीनकालादारभ्य अद्यावधि निरवच्छिन्नं जायमानं वर्तते। विषयेस्मिन् प्राचीनकालाद् विचारोऽपि प्रवर्तत एव। ध्वनिपरिवर्तनविषये आचार्ययास्क: , पतञ्जलि: ,पाणिनि: , भर्तृहरिश्चेत्यादय: प्रमुखा: विवेचनम् अकार्षु:। पाश्चात्यविद्वत्सु पिशेल: , ग्रियर्शन: , मैक्समूलर:, ब्लूमफील्डश्चेत्यादय: सादरं स्मर्यन्ते।

वैदिकभाषाम् आरभ्य आधुनिकभारतीयार्यभाषां यावत् यत् ध्वनिपरिवर्तनं समभवत्तस्य द्विधा विभागो भवति-
(1) मात्रात्मकपरिवर्तनम् (2) गुणात्मकपरिवर्तनञ्च।[13]

मात्रात्मके परिवर्तने स्वराणां ह्रस्वदीर्घादिपरिवर्तनं विचार्यते किञ्च गुणात्मके एक: वर्ण: अन्यवर्णरूपेण कथं परिवर्त्यते इति वर्ण्यते।

---

[10] तत्रैव

[11] तत्रैव,पृ.32

[12] निरुक्तम् ,1.2

[13] Elements of the Science of Language.P.123

(1) मात्रात्मकपरिवर्तनम् ( Quantative Change)

संस्कृभाषायां मात्राया: सम्बन्ध: कालेन सह मन्यते। ध्वनीनाम् उच्चारणदृष्ट्या स्वर: त्रिविध: भवति - ह्रस्व: दीर्घ: प्लुतश्च। एतेषामुच्चारणकालविषये उच्यते -

**एकमात्रा भवेध्रस्व: द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्।।**

एवं रीत्या स्वराणां मात्रासु ह्रस्वदीर्घप्लुतादिभेदेन यत् परिवर्तनं जायते तत् मात्रात्मक-परिवर्तनं मन्यते। यथा -

अ > आ , आ > अ , इ > ई , ई > इ , उ > ऊ ,ऊ >उ ।

डा.बनारसीदासजैन: मात्रात्मकपरिवर्तनस्य प्रधानं कारणं बलाघातं स्वीकरोति।[14]

(2) गुणात्मकपरिवर्तनम् (Qualitative Change)

गुणात्मकपरिवर्तनस्य अभिप्रायोऽस्ति यत् एक: स्वर: अपरस्वरेण किञ्च एकं व्यञ्जनम् इतरव्यञ्जनरूपेण कथं परिवर्तितं भवति इति।[15] यथा-

अ> इ , क्> ग् , च् > ज् , व् > ब् , य् > ज् ।

**स्वराणाम् आदावन्ते स्थिति:-**

प्राचीनभारतीयभाषासु शब्दस्य आदिस्वर: आधुनिकभारतीयभाषासु प्राय: संरक्षित एव परम् आदिस्वरे स्वराघातस्य अभावेन तत्र विकारोत्पन्न:। मैथिल्याम् ऋकारं विहाय संस्कृतस्य सर्वेऽपि स्वरा: सुरक्षिता: सन्ति , किन्तु मैथिल्याः ध्वनिनियमानुसारं क्वचित् दीर्घात् ह्रस्व: क्वचिच्च ह्रस्वात् दीर्घ: अभवत् ।[16] अधुना संस्कृतमैथिलीभाषयो: स्वरव्ञ्जनयो: परिवर्तनं कथं भवतीति अ परिशीलयामि।

यथा-

| संस्कतम् – अ/आ | मैथिली- अ/आ |
|---|---|
| अर्क:<br>हस्त:<br>आकाश:<br>पाताल: | आक<br>हाथ<br>अकास<br>पताल |

| संस्कतम् – इ/ई | मैथिली – इ /ई |
|---|---|
| भिक्षा<br>गौरी<br>ईश्वर: | भीख<br>गोरि<br>इसर |

[14] BSOS, VOL.28 , P.NO.316

[15] S.K .Bhardwaj , Linguistic Studies in Dharam Sutras,P.No.35

[16] मै॰ परि॰ पृ. 51

| संस्कतम् – उ /ऊ | मैथिली – उ/ऊ |
|---|---|
| मुष्टि: | मूठि |
| प्रभूतम् | बहुत |
| मूर्ख: | मुरुख |
| सूर्य: | सुरुज |

संस्कतम् - ऋ मैथिली – अ /आ ,इ /ई, उ/ ऊ

ऋध्वनि: मैथिल्यां चतुर्धा परिवर्तित: अस्ति । यथा -

(क) ऋ = अ/आ - वृषभ: > बसहा, गृहम् > घर , विकृतम् > विकट

(ख) ऋ = इ/ई - कृष्ण: > किसन, घृणा > घिन , घृत> घी , धृष्ट:> ढीठ

(ग) ऋ=उ/ऊ - भृज्ज:> भूज, शृणोति > सुनए, पृच्छा- पूछ

(घ) ऋ= इति - वृक्ष:> बिरिछ, तृप्त:> तिरिपित, पृथ्वी >पिरथी

| संस्कृतम्- ए/ऐ | मैथिली- ए/ऐ |
|---|---|
| एकादश: | एगारह |
| ज्यैष्ठ: | जेठ |
| तैलम् | तेल |
| चैत्र: | चेत |

| संस्कृतम्- ओ/ औ। | मैथिली - ओ/औ |
|---|---|
| ओष्ठम् | ओठ |
| पौत्र: | पोता |
| गौरी | गोरि |
| औषधम् | औखद |

| संस्कतम्- क् | मैथिली - ग् |
|---|---|
| सकलम् | सगर |
| शाक: | साग |

| संस्कतम्- ग् | मैथिली-घ् |
| --- | --- |
| गृहम्<br>ग्रास: | घर<br>घास |

| संस्कतम्- य् /ध् | मैथिली-ज्/झ |
| --- | --- |
| योध्यम्<br>बोध्यम् | जूझब<br>बूझब |

| संस्कतम्- त् | मैथिली-ट् |
| --- | --- |
| खट्वा<br>त्रोटनम्<br>मणित्रिक: | खाट<br>टूटब<br>मनटीका |

| संस्कतम् -द्/ल् | मैथिल-ड् |
| --- | --- |
| भाण्ड:<br>दोलिका<br>तालम् | भाँड<br>डोल<br>ताड |

| संस्कतम्- ठ | मैथिली-ढ् |
| --- | --- |
| पठ्<br>पीठिका<br>वृद्धः | पढब<br>पीढी<br>बूढ |

| संस्कतम्-  ल्/ण् | मैथिली-न् |
| --- | --- |
| लवणम्<br>गणनम् | नोन<br>गनब |

| संस्कतम् -ल् /ज्ञ् | मैथिली- न् |
|---|---|
| नम्रृ<br>ज्ञाति:<br>ज्ञातिगृहम्<br>लवणम्<br>लिम्पनम् | नाति<br>नाति<br>नइहर<br>नोन<br>निपब |

य् – अयं ध्वनि: तत्समशब्देष्वेव दृश्यते। मैथिल्यामस्य उच्चारणं परम्परया र् ह् ध्वन्यो: अग्रे ज् ध्वनिवत् भवति। अन्यत्र संस्कृतवदेव। लेखनं तु सर्वत्र यकार: एव भवति। यकारस्य जकारोच्चारणं कदाचित् शुक्लयजुर्वेदस्य मिथिलाञ्चले प्रभावादपि मन्तुं शक्यते। उदाहरणानि यथा-

| संस्कृतम् | मैथिली |
|---|---|
| यमुना<br>आर्य<br>सह्यम् | जमुना<br>आर्ज<br>सहज |

व् - विशुद्धमैथिल्याम् अस्य प्रयोग: न दृश्यते। मैथिल्यां तत्समशब्देषु वकारस्य प्रयोग: भवति किन्तु तत्र बकारवदुच्चारणं श्रूयते।[17]

यथा –

| संस्कृतम् | मैथिली |
|---|---|
| शिव:<br>विद्या<br>देवता<br>नवम् | सिब<br>बिद्या<br>देबता<br>नऽब |

किन्तु स्पर्शानन्तरं वकारोच्चारणमेव भवति। यथा-

| | |
|---|---|
| स्वाद:<br>क्वाथ:<br>अन्वय:<br>त्वदीयम् | स्वाद<br>क्वाथ<br>अन्वय<br>त्वदीय |

[17] मै.परि.पृ.42

ष - षध्वनिरपि तत्समेषु एव प्राप्यन्ते। अत्रापि वैदिकोच्चारणपद्धते: प्रभाव: स्पष्टत: परिलक्ष्यते। यथा-

| संस्कृतम् | मैथिली |
|---|---|
| षष्ठी<br>षड् रस:<br>दोष:<br>षडानन: | खष्ठी<br>खटरस:<br>दोख<br>खडानन |

इत्थं मैथिलीसंस्कृतभाषयो: ध्वनिविज्ञानदृष्ट्या अध्ययनेन ज्ञायते यत् मैथिल्या: ध्वन्यात्मकवैशिष्ट्यं संस्कृतभाषया सह साम्यं भजते। क्वचित् मैथिली लौकिकसंस्कृतभाषाया: अपेक्षा वैदिकसंस्कृतभाषया साकम् अधिकं नैकट्यं स्थापयति। वर्तमानमैथिल्यां वैदिकसंस्कृतस्य बह्व्य: विशेषता: सन्ति। प्रातिशाख्यग्रन्थानां शिक्षा-ग्रन्थानाञ्चानुसारं **“यद्भूतं यच्च भाव्यम् "** इत्यस्योच्चारणं **" जद्भूतं जच्च भाव्यम् "** इति भवति। एषा एव प्रवृत्ति: प्रायश: मैथिल्यां विलोक्यते।

मैथिल्यां वेदवत् 'ष्' ध्वने: 'ख' उच्चारणं मिलति। वैदिकसंस्कृते ल् , ल्ह् ध्वनी लौकिके लुप्तौ किन्तु मैथिल्यामस्यास्तित्वं विद्यत एव। अत्र ऐ, औ इत्यनयो: उच्चारणं अइ /अउ इति सन्ध्यक्षरवत् भवति।[18] यथा-

| संस्कृतम् | मैथिली |
|---|---|
| कैलाश:<br>वैदेही<br>गौतम: | कइलास<br>वइदेही<br>गउतम |

एषा प्रवृत्ति: प्राकृतादिद्वारा समागता इति प्रतिभाति। मैथिली-भाषायां वर्गस्य प्रथमवर्णस्य स्थाने शब्दान्ते तृतीयवर्ण: प्रयुज्यते। यथा-

| संस्कृतम् | मैथिली |
|---|---|
| शाकम्, | साग |

पुनश्च मैथिलीभाषायां समीकरणं, विषमीकरणम्, सघोषीकरणम्, अघोषीकरणम्, आगम:,लोप:, विपर्ययश्चेत्यादिप्रवृत्तयोऽपि लभन्ते। मैथिल्यां सानुनासिकताया: प्रवृत्ति: महत्त्वपूर्णा विद्यते।

इत्थं मैथिल्या: सर्वा: अपि ध्वन्यात्मकविशेषता: परिशील्य वक्तुं शक्यते यत् मैथिली संस्कृतात् न केवलं विकसिता अपितु संस्कृतभाषाया: काश्चन विशेषता: अपि आत्मनि समाहृत्य अद्यापि स्वस्य स्वतन्त्रं किञ्चन विशिष्टं चिह्नं स्थापयति।

[18] मै॰भा॰वि॰ पृ॰69

सन्दर्भग्रन्थसूची-

1. अष्टाध्यायी- पाणिनिः , शिवसंस्कृतसंस्थानम् , वाराणसी ,2003
2. निरुक्तम् – सम्पादकः,प्रो. उमाशंकरशर्मा ऋषि, चौखम्बा विद्याभवन, वाराणसी,1989
3. मैथिली भाषा का विकास , गोविन्द झा ,बिहार हिन्दी ग्रन्थ अकादमी,पटना, 2008
4. मैथिली परिशीलन , पं. गोविन्द झा, मैथिली अकादमी , पटना , 2007
5. भाषाविज्ञान एवं भाषाशास्त्र – डा.कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी,2010
6. भाषाविज्ञान तथा लिपिविज्ञान – प्रो. ब्रह्मचारी सुरेन्द्र कुमार , नालंदा मुक्त विश्वविद्यालय, पटना ,2009
7. लघुसिद्धान्तकौमुदी- पं.सदाशिवशास्त्री , चौखम्बा संस्कृत सीरीज ,वाराणसी ,2014
8. वैयाकरणसिद्धान्तकौमुदी – डा. अर्कनाथ चौधरी , जगदीश संस्कृत पुस्तकालय , जयपुर,2015
9. संस्कृतभाषाविज्ञानम् – चक्रवर्ती श्रीरामाधीनचतुर्वेदी , चौखम्बा विद्याभवन, वाराणसी,2011
10. Linguistic Analysis of Paninian Grammar – Dr.Shashibhushan Mishra , The Banaras Mercantile Co. Kolkata,2012
11. Outlines of linguistic analysis, B.Bloch & G.L.Trager, Linguistic Society of America, 1942